# श्री काली कवचं (मंत्र सहितं)

कवचं श्रोतु मिच्छामि तां च विद्यां दशाक्षरीम् ।
नाथ त्वत्तो हि सर्वज्ञ भद्रकाल्या श्च साम्प्रतम् ॥ १ ॥

## नारायण उवाच

श्रृणु नारद वक्ष्यामि महाविद्यां दशाक्षरीम् ।
गोपनीयं च कवचं त्रिषु लोकेषु दुर्लभम् ॥ २ ॥

ह्रीं श्रीं क्लीं कालिकायै स्वाहेति च दशाक्षरीम् ।
दुर्वासा हि ददौ राज्ञे पुष्करे सूर्यपर्वणि ॥ ३ ॥

दशलक्ष जपेनैव मन्त्रसिद्धि: कृता पुरा ।
पञ्चलक्ष जपेनैव पठन् कवच मुत्तमम् ॥ ४ ॥

बभूव सिद्धकवचोप्ययोध्यामाजगाम स: ।
कृत्स्नां हि पृथिवीं जिग्ये कवचस्य प्रसादत: ॥ ५ ॥

## नारद उवाच

श्रुता दशाक्षरी विद्या त्रिषु लोकेषु दुर्लभा ।
अधुना श्रोतु मिच्छामि कवचं ब्रूहि मे प्रभो ॥ ६ ॥

## नारायण उवाच

श्रृणु वक्ष्यामि विप्रेन्द्र कवचं परमाद्भुतम् ।
नारायणेन यद् दत्तं कृपया शूलिने पुरा ॥ ७ ॥

www.viswakalyanam.org





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

त्रिपुरस्य वधे घोरे शिवस्य विजयाय च ।
तदेव शूलिना दत्तं पुरा दुर्वाससे मुने ॥ ८ ॥

दुर्वाससा च यद् दत्तं सुचन्द्राय महात्मने ।
अतिगुह्यतरं तत्त्वं सर्वमन्त्रौघविग्रहम् ॥ ९ ॥

ह्रीं श्रीं क्लीं कालिकायै स्वाहा मे पातु मस्तकम् ।
क्लीं कपालं सदा पातु ह्रीं ह्रीं ह्रीमिति लोचने ॥ १० ॥

ह्रीं त्रिलोचने स्वाहा नासिकां मे सदावतु ।
क्लीं कालिके रक्ष रक्ष स्वाहा दन्तं सदावतु ॥ ११ ॥

ह्रीं भद्रकालिके स्वाहा पातु मेऽधरयुग्मकम् ।
ह्रीं ह्रीं क्लीं कालिकायै स्वाहा कण्ठं सदावतु ॥ १२ ॥

ह्रीं कालिकायै स्वाहा कर्णयुग्मं सदावतु ।
क्रीं क्रीं क्लीं काल्यै स्वाहा स्कन्धं पातु सदा मम ॥ १३ ॥

क्रीं भद्रकाल्यै स्वाहा मम वक्षः सदावतु ।
क्रीं कालिकायै स्वाहा मम नाभिं सदावतु ॥ १४ ॥

ह्रीं कालिकायै स्वाहा मम पष्ठं सदावतु ।
रक्त बीजविनाशिन्यै स्वाहा हस्तौ सदावतु ॥ १५ ॥

ह्रीं क्लीं मुण्डमालिन्यै स्वाहा पादौ सदावतु ।
ह्रीं चामुण्डायै स्वाहा सर्वाङ्गं मे सदावतु ॥ १६ ॥

प्राच्यां पातु महाकाली आगनेय्यां रक्त दन्तिका ।
दक्षिणे पातु चामुण्डा नैर्ऋत्यां पातु कालिका ॥ १७ ॥



With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

श्यामा च वारुणे पातु वायव्यां पातु चण्डिका ।
उत्तरे विकटास्या च ऐशान्यां साट्टहासिनी ॥ १८ ॥

ऊध्र्व पातु लोलजिह्वा मायाद्या पात्वध: सदा ।
जले स्थले चान्तरिक्षे पातु विश्वप्रसू: सदा ॥ १९ ॥

इति ते कथितं वत्स सर्वमन्त्रौघविग्रहम् ।
सर्वेषां कवचानां च सारभूतं परात्परम् ॥ २० ॥

सप्तद्वीपेश्वरो राजा सुचन्द्रोऽस्य प्रसादत: ।
कवचस्य प्रसादेन मान्धाता पृथिवीपति: ॥ २१ ॥

प्रचेता लोमशश्चैव यत: सिद्धो बभूव ह ।
यतो हि योगिनां श्रेष्ठ: सौभरि: पिप्पलायन: ॥ २२ ॥

यदि स्यात् सिद्धकवच: सर्वसिद्धीश्वरो भवेत् ।
महादानानि सर्वाणि तपांसि च व्रतानि च ॥ २३ ॥

निश्चितं कवचस्यास्य कलां नार्हन्ति षोडशीम् ॥ २४ ॥

इदं कवचमज्ञात्वा भजेत् कलीं जगत्प्रसूम् ।
शतलक्षप्रप्तोपि न मन्त्र: सिद्धिदायक: ॥ २५ ॥

**इति श्री काली कवचं सम्पूर्ण**





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133